# अष्टमः अभ्यासः

# अशुद्धिसंशोधनम्

**1. अधोलिखितानि वाक्यानि ध्यानेन पठत –**

(क) **सः** बालिका अस्ति।

(ख) **तौ** बालकाः क्रीडन्ति।

(ग) शिक्षकः सूचनां **वदन्ति**।

(घ) **श्वः** कार्यक्रमः अभवत्।

(ङ) त्वं पाठं **पठति**।

(च) क्रीडकः **कन्दुकं** क्रीडति।

(छ) माता **बालकं** मोदकं ददाति।

वयं पश्यामः यत् उपरितन-वाक्येषु रेखाङ्कितानि पदानि शुद्धानि न सन्ति। यदि ध्यानेन पश्यामः तर्हि अवगम्यते यत् एतेषु लिङ्ग-वचन-लकार-पुरुष-विभक्ति-दृष्ट्या दोषाः सन्ति। अतः सर्वदा अपि वाक्यनिर्माण-सन्दर्भे एते अंशाः अनिवार्यतया अवधातव्याः।

**2. अधुना उपरितन-वाक्यानां शुद्धरूपाणि पश्यामः –**

(क) **सा** बालिका अस्ति। (लिङ्गसम्बद्धः)

(ख) **ते** बालकाः क्रीडन्ति। (वचनसम्बद्धः-विशेषण-विशेष्यम्)

(ग) शिक्षकः सूचनां **वदति**। (कर्तृक्रियात्मकः वचनसम्बद्धः)

(घ) **ह्यः** कार्यक्रमः अभवत्। (लकारसम्बद्धः)

(ङ) त्वं पाठं **पठसि**। (पुरुषसम्बद्धः)

(च) क्रीडकः **कन्दुकेन** क्रीडति। (विभक्तिसम्बद्धः)

(छ) माता **बालकाय** मोदकं ददाति। (विभक्तिसम्बद्धः)

**3. अधोलिखितानि वाक्यानि संशोध्य लिखत – ( लिङ्गसम्बद्धानि वाक्यानि )**

(क) उत्तमा **बालकः** तत्र अस्ति। ..........................................................

(ख) अद्य मम **मित्रः** गृहम् आगच्छति। ..........................................................

(ग) **सुन्दरः** वातावरणम् अस्ति। ..........................................................

(घ) **विशाला** जलधिः अस्ति। ..........................................................

(ङ) **वृक्षं** छायां फलं च ददाति। ..........................................................

**4. वचनसम्बद्धानि वाक्यानि –**

(क) <u>**सुन्दरी**</u> बालिका: वार्तां कुर्वन्ति। ..............................

(ख) <u>**युवां**</u> पाठं पठसि। ..............................

(ग) तत्र <u>**निपुण:**</u> क्रीडकौ क्रीडत:। ..............................

(घ) अहं श्लोकान् <u>**स्मराम:**</u>। ..............................

(ङ) कार्यक्रम: उत्तम: <u>**अभवन्**</u>। ..............................

**5. लकारसम्बद्धानि वाक्यानि –**

(क) श्व: परीक्षा <u>**अभवत्**</u>। ..............................

(ख) अहं <u>**परह्य:**</u> विदेशं गच्छामि। ..............................

(ग) त्वं ह्य: कुत्र <u>**गमिष्यसि**</u>। ..............................

(घ) पुरा श्रीराम: अयोध्याया: राजा <u>**अस्ति**</u>। ..............................

(ङ) राघव: परश्व: वेदपारायणम् <u>**अकरोत्**</u>। ..............................

**6. पुरुषसम्बद्धानि वाक्यानि –**

(क) यूयं लेखम् <u>**अलिखन्**</u>। ..............................

(ख) स: कार्यं <u>**कुरु**</u>। ..............................

(ग) वयं सर्वे संस्कृतेन सम्भाषणं <u>**कुर्वन्ति**</u>। ..............................

(घ) क्रीडका: तत्र <u>**क्रीडत**</u>। ..............................

(ङ) <u>**भवन्तौ**</u> कस्य देशस्य नागरिकौ स्थ: ? ..............................

**7. विभक्तिसम्बद्धानि वाक्यानि –**

(क) कृषक: <u>**ग्रामेण**</u> नगरं गच्छति। ..............................

(ख) राघवेन्द्र: <u>**लेखन्या:**</u> लिखति। ..............................

(ग) <u>**गणेशं**</u> मोदकं रोचते। ..............................

(घ) बाला: जन्तुशालायां <u>**जन्तव:**</u> पश्यन्ति ..............................

(ङ) छात्र: <u>**विद्यालये**</u> गच्छति। ..............................

## मिश्रितप्रश्ना:

**1. अधोलिखितवाक्येषु रेखाङ्कितशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुन: लिखत –**

(क) भारति! तव अयं कोश: <u>**अपूर्वं**</u> विद्यते।

(i) अपूर्व: (ii) अपूर्वा (iii) अपूर्वा: (iv) अपूर्वाणि

(ख) नास्ति **रागसमानि** दुःखम्।

(i) रागसमः (ii) रागसमा (iii) रागसमम् (iv) रागसमे

(ग) बोधिसत्त्वः शिवीनां राजा **अभवम्**।

(i) अभवः (ii) अभवत् (iii) अभवम् (iv) अभवन्

(घ) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः **अवदत**।

(i) अवदत् (ii) वदिष्यति (iii) अवदम् (iv) अवदन्

(ङ) **अहम्** अपि तत् नेत्रं यथास्थानम् अस्थापयत्।

(i) सः (ii) त्वम् (iii) आवाम् (iv) ते

**2. अधोलिखितानि वाक्यानि त्रुटियुक्तानि सन्ति, भवन्तः एतानि संशोध्य लिखन्तु -**

(क) भूयः प्रीताः शक्रः वरम् अयच्छत्। ..............................

(ख) सरस्तीरे राजहंसः हंसी च विहरन्ति। ..............................

(ग) सः कथं माम् अपि अधिक्षिपसि। ..............................

(घ) मम केकारवं श्रुत्वा कोकिलः अपि लज्जामहे। ..............................

(ङ) युवां न तावत् कलहेन समयं वृथा यापयेत। ..............................

**3. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चिनुत -**

(क) कस्मिंश्चित् नगरे चन्द्रो नाम भूपति **प्रतिवसतः** स्म।

(i) प्रतिवसति (ii) प्रतिवससि (iii) प्रतिवसामि (iv) प्रतिवसन्ति

(ख) सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं **भवति**।

(i) अभवत् (ii) भवतु (iii) भविष्यति (iv) भवेत

(ग) यूथपः सर्वान् कपीन् आहूय रहसि **अवदम्**।

(i) वदति (ii) वदिष्यन्ति (iii) अवदन् (iv) अवदत्

(घ) कपयः प्रहस्य **अवदाम**।

(i) अवदत् (ii) अवदम् (iii) अवदन् (iv) वदिष्यन्ति

(ङ) ऊर्णाप्रचुरः **मेषौ** दाहवेदनया भूमौ लुठति।

(i) मेषम् (ii) मेषः (iii) मेषेण (iv) मेषेस्य

**4. एतानि त्रुटियुक्तानि वाक्यानि यूयं संशोध्य पुनः लिखत -**

(क) चञ्चलः हि मनः कृष्ण। ..............................

(ख) मनं दुर्निग्रहं चलं च भवति। ..............................

(ग) अयं पुरुषः पापं चरसि। ..............................

(घ) अग्निः इव दहन्ति मामयं शोकः। ..............................

(ङ) नकुल: तव सारथि: भव। ..............................

5. **अधोलिखितवाक्येषु रेखाङ्कितानि पदानि अशुद्धानि सन्ति, विकल्पेभ्य: उचितं शुद्धं विकल्पं चिनुत –**

(क) मन्ये **<u>ते</u>** ब्रह्मास्त्रप्रयोगं न करिष्यति।

(i) स: (ii) त्वम् (iii) अहम् (iv) तौ

(ख) रे दुष्ट भीम! त्वम् अद्य **<u>वध्योऽस्मि</u>**।

(i) वध्योऽस्ति (ii) वध्योऽसि (iii) वध्य: सन्ति (iv) वध्य: स्म:

(ग) युधिष्ठिरार्जुनौ रथारोहणं **<u>नाटयति</u>**।

(i) नाटयन्ति (ii) नाटयथ: (iii) नाटयत: (iv) नाटयाम:

(घ) न जानाति भवान् द्रौणे: **<u>चपलं</u>** प्रकृतिम्।

(i) चपलाम् (ii) चपला (iii) चपलया (iv) चपलाया:

(ङ) प्रच्छन्नभाग्यस्य भार्या **<u>बुद्धिमान्</u>** आसीत्।

(i) बुद्धिमन्त: (ii) बुद्धिमन्तौ (iii) बुद्धिमती (iv) बुद्धिमत्य:

6. **अधोलिखितवाक्येषु काश्चन अशुद्धय: सन्ति। ता: अपाकृत्य वाक्यानि संशोध्य लिखत –**

(क) परद्रव्ये अनासक्त: सा न्यवेदयत्। ..............................

(ख) अहो विचित्र: स्वप्नं मया दृष्ट:। ..............................

(ग) दुष्टबुद्धि: क्षेत्रं गता। ..............................

(घ) वाक्पटु: धैर्यवती मन्त्री न परिभूयते। ..............................

(ङ) वयं स्वागतं कुर्वन्ति। ..............................

7. **अधोलिखितवाक्येषु रेखाङ्किताशुद्धपदाय उचितं पदं चिनुत –**

(क) कृष्ण! मन: हि **<u>चञ्चल:</u>**।

(i) चञ्चलम् (ii) चञ्चला (iii) चञ्चल! (iv) चञ्चलानि

(ख) स: शस्यक्षेत्रे हलकार्यं कर्तुम् **<u>आरभे</u>**।

(i) आरभन्त (ii) आरभध्वम् (iii) आरभेताम् (iv) आरभत

(ग) 'साडकेन' एकम् अन्यत् पर्व **<u>सन्ति</u>**।

(i) अस्मि (ii) अस्ति (iii) असि (iv) स्त:

(घ) अहं **<u>जानासि</u>** इदं स्थानम्।

(i) जानाति (ii) जानन्ति (iii) जानामि (iv) जानीम:

(ङ) काल: भूतं वर्तमानं भविष्यदपि च **<u>वीक्षमाणं</u>** जगत: विकासस्य साक्षी भवति।

(i) वीक्षमाणानि (ii) वीक्षमाणा (iii) वीक्षमाणा: (iv) वीक्षमाण: